# शास्त्रितृतीयवर्षम्

# षष्ठपत्रम्– नव्यन्यायः

# शैक्षिकनिष्पत्तिः

**ग्रन्थः – पक्षता ,**

**पाठ्यग्रन्थस्यास्य अध्ययनेन छात्राः-**

❖पक्षतानिरूपणे सङ्गतिं, पूर्वपक्षीय साध्यसंशयपक्षतालक्षणं, तत्र वह्निव्याप्यसाध्यकस्थले वह्निमत्तासंशयस्य पक्षतात्वशङ्कासमाधाने, संशयत्वदलार्थनिर्वचनं, तत्सार्थक्यं, साध्यपक्षभेदेन पक्षतायाः नानात्वं, मतभेदेन संशयत्वदलार्थनिर्वचनं तत्परिशीलनं च विजानीयुः।

❖अनुगतरूपेण संशयस्य लक्षणे प्रवेशप्रयोजनं, सम्बन्धैक्यनिवेशसार्थक्यं, मूलोक्तयथाश्रुतस्य परित्यागबीजं, साध्यसंशयस्य-सिद्धिबाधोभयाभावस्य-सिद्ध्यभावमात्रस्य-सिषाधयिषामात्रस्य वा पक्षतात्वत्वे अनुपपत्तिं चावगच्छेयुः।

❖सिद्धान्तपक्षतालक्षणं, तत्र सिषाधयिषापदार्थं, सिद्धौ उत्तेजकीभूततत्तदिच्छाभावकूटनिवेशप्रकारं, अनुमिति-इच्छाविशेषयोः प्रतिबध्यप्रतिबन्धकभावं, पक्षतायाः लिङ्गविशेषनियन्त्रितत्वं चावगन्तुं समर्थाः भवेयुः।

❖साधकमानपदार्थनिर्वचनं, प्रतिबन्धकीभूततत्तत्सिद्ध्यभावस्य प्रवेशनं, सिद्धि-अनुमित्योः समानधर्मावच्छिन्नविशेष्यताकत्व-प्रकारताकत्वनिवेशनावश्यकत्वं, सामानाधिकरण्येन अवच्छेदकावच्छेदेन च अनुमितौ सिद्धिविशेषस्य प्रतिबन्धकत्वप्रकारं, पक्षविशेष्यकानुमितौ सिद्धेः प्रतिबन्धकत्वप्रकारं च ज्ञातुं शक्नुयुः।

❖पूर्वानुमित्सानाशेऽपि सिद्धिकाले अनुमित्युत्पत्तिनिर्वाहकोपाध्यायमतं, अनुमित्सायोग्यतायाः उत्तेजकत्ववादिमिश्रमतं, सिद्धियोग्यतायाः प्रतिबन्धकत्वं, सार्वभौमसम्मतपक्षता स्वरूपं च विजानीयुः।

❖सार्वभौमोक्तपक्षतालक्षणद्वस्य समन्वयं, दलसार्थक्यम्, अव्यवहितोत्तरत्व-अव्यवहितपूर्वत्व परिष्कारप्रकारं, प्रतिबन्दिप्रदर्शनपूर्वकं तन्मतनिरासप्रकारं, यज्ञपत्युपाध्यायोक्तपक्षतालक्षणनिरासप्रकारं, सिद्ध्युत्तरानुमिति-सिषाधयिषयोः कार्यकारणभाववादिमते अनुपपत्तिं, पक्षता अनुमितिं प्रति कारणतावच्छेदिकैवेति मते अनुपपत्तिं च विजानीयुः।